भूतडामरसङ्केतबोधार्थं भूतडामरीयबीजनामा-न्यपि लिख्यन्ते ।
प्रणवो विषबीजं स्यात् ध्रुवं हालाहलं स्मृतम् ।
कालमृतिपथं ज्ञेयं बहुरूपी निरञ्जनम् ।प्रणवम्।
चननस्थं व्योमवक्त्रं धूम्रभैरवलङ्कृतम् ।
नादबिन्दुसमायुक्तं बीजं मायात्मकं स्मृतम् ।ह्रीं
क्रोधीशं चतमारूढं धूम्रभैरवलङ्कृतम् ।
विद्या जिह्वा बिन्दुयुतं पितृभूवासिनी स्मृतम्।क्रीं
क्रोधकालात्मकं कुर्य्याद्भौतिकं वाग्भवं स्मृतम् ।
नादबिन्दुसमायुक्तं समाधायोग्रभैरवीम् ।
बीजमेतत्तु कथितं शुद्धबुद्धिप्रवर्त्तकम् । ऐं ।
क्रोधीशं बलभद्रधूम्रभैरवीनादबिन्दुभिः ।
चिन्ह्संमन्मथं कामराजस्त्रैलोक्यमोहनम् ।
इन्द्रासनगतो ब्रह्म सर्व्वांसु समन्मथः ।क्लीं ।
संयुक्तं धूम्रभैरव्यारक्तस्थं बलिभोजनम् ।
नादबिन्दुसमायुक्तं किङ्किणी बीजमुत्तमम् ।स्त्रीं।
नादबिन्दुसमायुक्तं रक्तस्थं बलिभोजनम् ।
कालरात्र्यासनोपेतं विघ्निखाख्यं महामनुम्।ह्रां।
विदार्य्यालिङ्गितोग्रात्योवसिक्तचतजोचतः ।
नादबिन्दुसमायुक्तो विज्ञेयः पिसिताशनम् ।हुं।
धूम्रध्वजाधः कालाग्निः सोऽहंकेशीन्दुबिन्दुभिः ।
युगान्तकारकं बीजं भैरवेन प्रकाशितम् ।स्रों।
कपर्द्दिनं समादाय चतजः चितिविग्रहम् ।
संयुक्तं धूम्रभैरव्या चोद्दयं नादबिन्दुमान् ।फ्रों।
कपालोद्दयमादाय महाकालेन भक्षितम् ।
समासनमिति प्रोक्तं चण्डिकाटंप्रयोजयेत् ।
ठं ठं ठः ठः ।
चतजस्थं व्योमवक्त्रं चन्द्रचतविभूषितम् ।
खद्योतमिति संप्रोक्तं ग्रासिनी कालरात्रियुक् ।
हूं ह्रूँ ।
चतजो चतमाकाशं नादबिन्दुविभूषितम् ।
विदारी भूषितस्त्रैव बीजं वैवस्वतोद्दकम् ।ह्रूँ।
कौर्म्माख्या कालवक्त्रा च महाकालेन साधितम्।
तदनादिपचरश्मिः सृष्टिस्थित्यन्ततद्विधिः । ॐ ।
व्योमस्थं तालजङ्घास्थं बिन्दुनादविभूषितम् ।
हूँ कालो महाकालः क्रोधबीजं निरञ्जनम्।हूं।
इति प्राक्तोषिणी । )
बीजकः, पुं, मातुलुङ्गकः इति जटाधरः । वृच-विशेषः । बिजयासार इति हिन्दी भाषा । तत्पर्य्यायः । पीतसारः २ पीतशालकः ३ बन्धूकपुष्पः ४ प्रियकः ५ सर्ज्जकः ६ आसनः ७ । अस्य गुणाः । कुष्ठवीसर्पश्वित्रमेहगुदक्रिमि-श्लेष्मास्रपित्तनाशित्वम् । त्वच्यत्वम् । केश्यत्वम् । रसायनत्वञ्च । इति भावप्रकाशः । ( यथा, हरिवंशे । १५५ । २० ।
"अथकैर्व्वीजकैश्चैव मन्दारैश्चोपशोभितम् ।")
बीजे, क्ली ।
बीजकृत्, क्ली, ( बीजं वीर्य्यं करोति वर्द्धयतीति । कृ + क्विप् । ) वाजीकरणम् । इति राजनिर्घण्टः ।
बीजकोशः } पुं, ( बीजानां कोष आधार इव । )
बीजकोषः } पद्मबीजाधारचक्रिका । पोंपञ इति ख्यातः । इति भरतः । तत्पर्य्यायः ।

वराटकः २ । इत्यमरः । कर्णिका ३ । इति जटाधरः । वारिकुब्जः ४ शृङ्गाटकः ५ । इति शब्दरत्नावली ।
बीजगर्भः, पुं, ( बीजानि गर्भेऽभ्यन्तरे यस्य । ) पटोलः । इति राजनिर्घण्टः ।
बीजगुप्तिः, स्त्री, ( बीजानां गुप्तिर्यत्र । ) शिम्बी । इति राजनिर्घण्टः ।
बीजधान्यं, क्ली, ( बीजप्रधानं धान्यम् । ) धान्य-कम् । इति राजनिर्घण्टः ।
बीजनं, क्ली, ( बीज्यतेऽनेनेति । वि + ईज + करणे ल्युट् । ) व्यजनम् । ( यथा, आर्य्यासप्तशत्याम् । ४५० ।
"मलयजमपसार्य्य घनं बीजनविघ्नं विधाय
बाहुभ्याम् ।
स्मरसन्तापादगणितनिदाघमालिङ्गते मिथु-
नम् ।")
वस्तु । कोके जीवञ्जीवे च पुं । इति सारस्वतः ।
बीजपादपः, पुं, ( बीजप्रधानः पादपः । ) भल्ला-तकः । इति राजनिर्घण्टः । ( बीजोत्पन्न-वृक्षमात्रञ्च । )
बीजपुष्पं, क्ली, ( बीजप्रधानं पुष्पं यस्य । ) मरु-वकः । मदनवृक्षः । इति मेदिनी । पे, २६ ।
बीजपूरः, पुं, ( बीजानां पूरः सम्भूहो यत्र । ) फल-पूरः । इत्यमरः । टावा लेबु इति बङ्गभाषा । बिजौरा इति हिन्दी भाषा । तत्पर्य्यायः । बीजपूर्णः २ पूर्णबीजः ३ सुकेशरः ४ बीजकः ५ केशराम्लः ६ मातुलुङ्गः ७ सुपूरकः ८ रुचकः ९ बीजफलकः १० जन्तुघ्नः ११ दन्तुरच्छदः १२ पूरकः १३ रोचनफलः १४ । अस्य फलगुणाः । अम्लत्वम् । कटुत्वम् । उष्णत्वम् । श्वासकास-पवनशमनत्वम् । कण्ठशोधनकरत्वम् । लघु-त्वम् । हृद्यत्वम् । दीपनत्वम् । रुचिकारि-त्वम् । पावनत्वम् । आध्मानगुल्महृद्रोगशोहो-दावर्त्तनाशित्वम् । विबन्धे हिक्कायां शूले छर्द्द्यां च.शस्तत्वञ्च । इति राजनिर्घण्टः । * ।
अपि च ।
"बीजपूरफलं स्वादु रसेऽम्लं दीपनं लघु ।
रक्तपित्तहरं कण्ठजिह्वाहृदयशोधकम् ।
श्वासकासारुचिहरं हृद्यं तृष्णाहरं स्मृतम् ।"
तद्भेदमधुकर्कटी । यथा,—
"बीजपूरोऽपरः प्रोक्तो मधुरो मधुकर्कटी ।
मधुकर्कटिका स्वाद्वी रोचनी शीतला गुरुः ।
रक्तपित्तक्षयश्वासकासहिक्काभ्रमापहा ।"
इति भावप्रकाशः ।
( यथा, महाभारते । ३ । १५८ । ४२ ।
"सुञ्जातकांस्तथा जीवान् दाडिमान् बीज-
पूरकान् ।")
बीजपूर्णः, पुं, ( बीजेन पूर्णः । ) छोलङ्गः । इति रत्नमाला । बीजपूरः । इति राजनिर्घण्टः ।
बीजपेशिका, स्त्री, ( बीजस्य शुक्रस्य पेशिकेव । ) अण्डकोषः । इति राजनिर्घण्टः ।
बीजफलकः, पुं, ( बीजप्रधानं फलं यस्य । कन् । ) बीजपूरः । इति राजनिर्घण्टः ।

बीजमातृका, स्त्री, ( बीजानां बीजमन्त्राणां मातेव जपमालात्वादस्यास्तथात्वम् । ) पद्मबीजम् । यथा,—
"पद्माचं पद्मबीजञ्च कर्णिका बीजमातृका ।"
इति हारावली ।
बीजरत्नः, पुं, ( बीजं रत्नमिव यस्य । ) माष-कलायः । इति हेमचन्द्रः ।
बीजरुहः, पुं, ( बीजात् रोहतीति । रुह + इगुपधात् कः । । ) शाल्यादिः । यथा,—
"कुरण्टाद्या अग्रबीजा मूलजास्तूत्पलादयः ।
पर्व्वयोनय इक्ष्वाद्याः स्कन्धजाः शल्लकीमुखाः ।
शाल्यादयो बीजरुहाः संमूर्च्छजास्तृणादयः ।
स्युर्व्वनस्पतिका यस्य वर्त्तते मूलजातयः ।"
इति हेमचन्द्रः ।
( क्वचित् वाच्यलिङ्गोऽपि दृश्यते । )
बीजरेचनं, क्ली, ( बीजं रेचनं रेचकं यस्य । ) जयपालः । इति राजनिर्घण्टः ।
बीजवपनं, क्ली, ( बीजानां वपनम् । ) क्षेत्रे बीजस्य क्षेपणम् । तस्य दिनं दीपिकायाम् ।
"पूर्व्वाश्रियाम्यफणिपित्र्यशिवान्यभेषु
रिक्ताष्टमीविगतचन्द्रतिथिं विहाय ।
द्वाङ्गालिगोसमुदये विकुजार्किवारे
शस्तेन्दुयोगकरणेषु हलप्रवाहः ।
हलप्रवाहवद्वीजवपनस्य विधिः स्मृतः ।
चित्रायाञ्च शुभे केन्द्रे स्थिरस्वमशुभोदये ।
हेमवारिविलिप्तस्य बीजस्योन्नयतः शुचिः ।
इन्द्रं चित्ते निधायाथ स्वयं मुष्टित्रयं वपेत् ।
कृत्वा चान्योन्यप्रोत्साहं नर्त्तको हृष्टमानसः ।
प्राङ्मुखः कलसं गृह्य इमं मन्त्रमुदीरयेत् ।
त्वं वै वसुन्धरे सीते बहुपुष्पफलप्रदे ।
नमस्ते मे शुभं नित्यं कृषिं मेधां शुभे कुरु ।
रोहन्तु सर्व्वशस्यानि काले देवः प्रवर्षतु ।
कर्षकास्तु भवन्त्वग्र्या धान्येन च धनेन च
स्वाहा ।
उप्त्वा बीजन्तु तत्रैव भोक्तव्यं बान्धवैः सह ।
बीजवपनं प्राजापत्यतीर्थेन । यथा, हारीतः ।
कनिष्ठायाः पश्चात् प्राजापत्यमावपनम् । होम-तर्पणे प्राजापत्येन कुर्य्यादिति । होमतर्पणे लाजहोमप्राशनकादितर्पणे । पराशरः ।
"वैशाखे वपनं श्रेष्ठं मध्यमं रोहिणीरवौ ।
अतः परस्मिन्नधमं न जातु श्रावणे शुभम् ।"
ज्योतिषे ।
"पूर्व्वभाद्रपदा मूलं रोहिण्युत्तरफल्गुनी ।
विशाखा शतभिषा वाथ धान्यानां रोपणे
वरा ।
सदोषा रजनी गौरी पुत्रवित्तैर्विमुच्यते ।
स्वयंजाते पुनस्ते द्वे पालयन् नैव दुष्यति ।
आरामे गृहमध्ये वा मोहात् सर्षपमावपन् ।
पराभवं रिपोर्य्याति ससाधनधनक्षयम् ।
निशा नीली पलाशश्च चिञ्चा श्वेतापराजिता ।
कोविदारश्च सर्व्वत्र सर्व्वं निघ्नन्ति मङ्गलम् ।"
निशा हरिद्रा । कोविदारको रक्तकाञ्चनः ।